International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(4): 220-223
© 2022 IJSR
www.anantaajournal.com
Received: 09-05-2022
Accepted: 12-06-2022

**रिगज़िन यंगडोल**
शोधच्छात्रा,
संस्कृतप्राच्यविद्याध्ययनसंस्थानम्
जवाहरलालनेहरूविश्वविद्यालयः
नई दिल्ली, भारत

**Corresponding Author:**
**रिगज़िन यंगडोल**
शोधच्छात्रा,
संस्कृतप्राच्यविद्याध्ययनसंस्थानम्
जवाहरलालनेहरूविश्वविद्यालयः
नई दिल्ली, भारत

# संस्कृतसाहित्ये सागरस्य सांस्कृतिकवैशिष्ट्यम्

## रिगज़िन यंगडोल

**सारांशः**

मानवीयजीवनस्य प्रेरकशक्तिः, आध्यात्मजीवनस्य प्रत्यक्षजीवनस्य च कल्याणकर्तृ भारतीयसंस्कृतिः विश्वसंस्कृत्यै प्राणदायिनी वर्तते। भारतीयसंस्कृतेस्थायित्वे प्रगतिशीलत्वे च नदीपर्वतसमुद्रादीनां महत्त्वं प्राचीनकालादेव वर्तते। भारतीयसंस्कृतेरुत्कर्षप्रतीकरूपोऽयं सागरः वैदिकसाहित्यादारभ्य लौकिकसाहित्यपर्यन्तं भारतस्य भौगोलिकसांस्कृतिकाध्यात्मिकभावनाः निरुपयति। मूर्तामूर्तयोरुभयोः रूपयोः सागरः संस्कृतसाहित्यस्य आकर्षणकेन्द्रमस्ति। भारतीयसमाजाय अयं सागरः प्रेरणाकर्ता-जीवनदाता-दुःखहर्त्तारुपेण जनमानसं प्रभावयति। वेदेषु धनभण्डाररूपे, पुराणेषु दैवीयशक्तिरुपे, रामायणे महाभारते च आध्यात्मिकतायाः आधाररूपे, संस्कृतमहाकाव्येषु मानवीयसंवेदनां व्यक्तकर्तारूपे सागरोऽयं भारतीयसंस्कृतेर्प्राणभूतः। अस्य विशालता-गाम्भीर्यता-सौन्दर्यता-उदारता-एकता-चञ्चलतादयः गुणाः संस्कृतकवीनां रचनासु मूर्त्तरुपत्वं प्रददति। सामाजिकसांस्कृतिक-उत्थानस्याधाररूपः हिमालयाद्प्रादुर्भूतानां नदीनामाश्रयश्च अयं सागरः भारतीयसंस्कृतेर्मोक्षदाता अस्ति।

**बीजशब्दाः** संस्कृतिः, सप्तसागरः, आध्यात्मिकता, गम्भीरता, उदारता, प्राणदायी

## प्रस्तावना

मानवीयजीवनस्य प्रेरकशक्तिः, आध्यात्मजीवनस्य प्रत्यक्षजीवनस्य च कल्याणकर्तृ भारतीयसंस्कृतिः विश्वसंस्कृत्यै प्राणदायिनी वर्तते। "संस्कृतिः संस्कृतमाश्रिता" अर्थात् भारतीयसंस्कृतेर्मूलाधारः संस्कृतम्। संस्कृतसाहित्ये वर्णिता संस्कृतिः विश्वसंस्कृतिषु सर्वश्रेष्ठा। भारतीयसंस्कृतेस्थायित्वे प्रगतिशीलत्वे च नदीसरोवरपर्वतादीनां बहु महत्त्वं गण्यते। भारतीयसांस्कृतिकवैशिष्ट्यस्य उत्कर्षस्य च प्रतीकोऽयं सागरः। अतः सागरः भारतस्य भौगोलिकविस्तारेण साकं सांस्कृतिकबोधमपि परिभाषयति।

विश्वसाहित्ये प्राचीनतमवैदिकसाहित्यादेव सृष्ट्युत्पत्तिः तथा तत्सम्बन्धी समस्यानां समाधानानां च ज्ञानं प्राप्यते। वेदेषु समुद्राणां नदीनाञ्च स्थानं धार्मिक-राजनैतिक-व्यापारिकदृष्ट्या प्रारम्भादेव महत्त्वपूर्णं वर्तते।

ऋग्वेदे सागरः धनागाररूपे प्रस्तूयते।[1] सागराद् व्यावसायिकलाभसन्दर्भाः वेदे प्राप्ताः।[2] वेदेषु गंगायमुनादिनदीनां स्तुतिः कल्याणीरूपे तथा च पोषितारूपे कृता।[3] ऋग्वेदे सिन्धुनद्याः सर्वाधिकं महत्त्वम्, यत्र एषा मातृवत् गौवञ्च मानवकल्याणकर्तृ कथिता।[4] अमरकोषे समुद्रपर्यायरूपे अब्धि-अकूपार-पारावार-सिन्धु-सागर-अर्णव-रत्नाकर-जलनिधि-यादःपति-अपांपति-सरित्पति-उदन्वद्-उदधि-सरस्वतादिशब्दाः प्रयुज्यन्ते।[5] पतञ्जलिकालीन-भारतानुसारं महाभाष्यकारेण स्वग्रन्थे सागरपर्याय-समुद्रशब्दस्य तथा च सागरसम्बद्धानां कच्छ-द्वीप-अनूप-अन्तरीपादिप्रदेशानां वर्णनं कृतम्।[6]

कस्यपि देशस्य सांस्कृतिकाध्ययनाय तत्कालीनभौगोलिकाध्ययनम् आवश्यकम्। यथार्थभौगोलिकज्ञानस्याभावे सांस्कृतिकमूल्यानां सम्यक् परिचयप्राप्तिः असम्भवा। पौरोणिकपरिशीलनादिदं परिज्ञायते यत् सृष्ट्युत्पत्तिकालादेव पृथिवी जम्बू-प्लक्ष-शाल्मल-कुश-कौञ्च-शाक-पुष्करादि-सप्तद्वीपेषु विभक्ता, तथा च प्रत्येकद्वीपः क्रमशः क्षारजल-इक्षुरस-सुरा-घृत-दधि-दुग्ध-मधुरजलानां सागरैर्युक्तः। विष्णुपुराणस्य प्रथमाध्याये भारतस्य भौगोलिकस्वरूपस्य प्रदर्शने हिमालयसागरयोः महत्ता वर्णिता।[7] पुराणेषु एषा भारतभूमिः मोक्षदायिनी कर्मभूमिश्च कथिता, यस्य प्रशंसा देवगणैरपि कृता।[8] ऐतिहासिकगवेषणारम्भः वेदेभ्यः जातः। वैदिकसाहित्यानन्तरं पुराण-उपपुराण-संहिता-काव्यग्रन्थेषु सागरस्य बहुविधरूपं दृश्यते। संस्कृतसाहित्ये सागरः न केवलं जलराशिरूपे अपितु अक्षयनिधिरूपे, मानवीयसंवेदनानां व्यक्ता तथा च प्रेरकरूपे प्रस्तुतः। वेदादतिरिक्तं लौकिकसाहित्येऽपि समुद्रः व्यापारिकमार्गस्य साधनमुक्तः। शिशुपालवधे समुद्रमाध्यमेन व्यापारस्योल्लेखः प्राप्यते।[9] मार्कण्डेयपुराणे समुद्रः पवित्रतायाः द्योतकः कथितः, समुद्रे अवस्थितौ चन्द्रद्वीपभद्रद्वीपौ, तौ पवित्रौ।[10] भट्टिकाव्ये एष गम्भीरतायाः प्रतीकरूपे प्रस्तुतः।[11] कुमारसम्भवस्य सप्तमसर्गे शिवपार्वतीविवाहप्रसंगे शिवपार्वतीसंगः समुद्रवत् चञ्चलः कथितः।[12]

भारतीयसंस्कृतौ आतिथ्यसत्कारस्य बहु महत्ता। शिशुपालवधे माघेन समुद्रः चेतनरूपे प्रस्तुतः, यः आतिथ्यसत्कारस्य कर्त्ता।[13] भट्टिना स्वकीयमहाकाव्ये भट्टिकाव्यस्य त्रयोदशसर्गे नदीनां स्वामी समुद्रः सुशरीरस्य अवस्थानः कथितः, यः शीतलवायुना युक्तः, यस्य तटाः तमाल-कदम्बादिवृक्षैः युताः तथा च गंगायाः आलम्बनाः।[14] कुमारसम्भवे पार्वत्याः सौन्दर्यस्यतुलना समुद्रतीरैः क्रियते।[15] अतः संस्कृतकवीनां रचनासु सागरस्य

---

[1] मध्वः सुदं पवस्य वस्व उत्सं वीरं च न आ पवस्वा भगं च।
स्वदस्वेन्द्राय पवमान इन्द्रो रयिं च न आ पवस्वा समुद्रात्॥ *ऋग्वेद*, ९.९७.४४

[2] नू रोदसी अहिना बुध्न्येन स्तुवीत देवी अप्येभिरिष्टैः।
समुद्रं न संचरणे सनिष्यवो धर्मस्वरसो नद्यो अपव्रन्॥ *ऋग्वेद*, ४.५५.६

[3] इमं गङ्गे यमुने सरस्वति शतुद्रि स्तोमं सचता परूष्णया।
असिक्न्या मरूद्वृधे वितस्तयार्जकीये शृणुह्या सुषोमया॥ *ऋग्वेद*, १०.७५.५

[4] अभि त्वा सिन्धो शिशुमिन्न न मातरो वाश्रा अर्षन्ति पयसेव धेनवः
राजेव युध्वा नयसि त्वमित्सिचौ यदासामग्रं प्रवतामिनक्षसि॥ *ऋग्वेद*, १०.७५.४

[5] *अमरकोष*, प्रथम काण्ड, पृष्ठ १३५

[6] *पतञ्जलिकालीन भारत*, प्रभुदयाल अग्निहोत्री पृष्ठ ७

[7] उत्तरं यत् सागरस्य हिमाद्रिश्चैव दक्षिणम्।
वर्षं तत् भारतं नाम भारती यत्र संततिः॥ *विष्णुपुराणम्*, २.३

[8] गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारत भूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरूषाः सुरत्वात्॥ *विष्णुपुराण*, ३.२४

[9] विक्रीय दिश्यानि धनान्युरूणि द्वैप्यानसावुत्तमलाभभाजः।
तरीषुतत्रत्यम्फल्गुभाण्डं सांयात्रिकानावपतोअभ्युनन्दत्॥ *शिशुपालवधम्*, ३.७

[10] चन्द्रद्वीपः समुद्रेचभद्रद्वीपस्तथापरः।
तत्रापिपुण्येविख्यातः समुद्रान्तर्महामुने॥ *मार्कण्डेयपुराणम्*, ५६.२८

[11] ततो जलधिगम्भीरान् वानरान् प्रत्युवाचः सा।
इयं दानवराजस्य पूः सृष्टिर्विश्वकर्मणः॥ *भट्टिकाव्यम्*, ७.६७

[12] दुकुलवासाः स वधूसमीपं निन्ये विनीतैरवरोधदक्षैः।
वेलासमीपं स्फुटफेनराजिर्नवैरूदन्वानिव चन्द्रपादैः॥ *कुमारसम्भवम्*, ७.७३

[13] लवङ्गमालाकलितावतंसास्ते नारिकेलान्तरपः पिबन्तः।
आस्वादितार्द्रक्रमुकाः समुद्रादभ्यागतस्य प्रतिपत्तिमीयुः॥ *शिशुपालवधम्* ३.८१

[14] *भट्टिकाव्यम्*, १३. ९-११

[15] क्षीरोदवेलेव सफेनपुञ्जा पर्याप्तचन्द्रेव शरित्त्रियामा।

उदात्तभावनाः कर्त्तारूपे प्रस्तुताः, एतेषां कवीनां रचनासु च तटीयप्रदेशानां नैसर्गिकीसुषमा प्राकृतिकसौन्दर्यञ्च समानं प्रशंसितम्। 'राजशेखर और उनका युग' इत्यस्यां रचनायां सप्तसमुद्रानां वर्णनम्, ये विविधरत्नानां धनानाञ्चागाराः। अत्रैव समुद्रतटीयप्रदेशाः उल्लिखिताः, ये व्यापारिकदृष्ट्या महत्त्वपूर्णाः।[16]

एतदातिरिक्तं सागरः प्रारम्भादेव भारतीयमानसं साहित्यञ्च प्रभावयति। भारतीयसमाजाययं अलौकिकप्रेरणायाः धार्मिकतायाः संस्कृतेश्च रक्षकरूपे अभिव्यक्तः। कालिदासेन कुमारसम्भवे समुद्रः पापघ्नः कथितः। [17] रघुवंशेऽयं विशालता-उदारता-एकतायाः प्रतीकत्वात् पूजनीयः[18], तथा च भारतभूमेः संस्कृतेश्च सुरक्षायाः प्रहरी।[19] वाल्मीकिना रामायणे रामचरित्रः सागरवत् गभीरः, त्रिकालेऽपि मर्यादापालकरूपे च प्रस्तुतः। आध्यात्मिकतायाः भावना भारतीयसंस्कृतेप्राणः। अतः कविभिः प्रायः प्राकृतिकदृश्याः क्रियाकलापाश्च मानवीयभावनारूपे प्रस्तुताः। पूजार्चनादिपरिदृश्यैः सागरं प्रति जनमानसस्य उदात्तभावना स्वभावतः दृश्यते। नैषधीयचरिते हर्षेण विष्णोर्शय्या, रत्नगर्भः समुद्रः प्रशंसितः।[20] रामायणस्य सुन्दरकाण्डे समुद्रः वरुणालयः इति संज्ञया संज्ञितः।[21]

सागरः भारतीयजीवनस्य विचाराणाम् आदर्शाणां च व्यक्तकर्त्ता, सहैव संस्कृतकवीनां कल्पनाशक्तिं मूर्तत्वप्रदायकः। भौतिकरुपेऽयं यथा विशालः गहनश्च तथैव आध्यात्मिकपक्षे शुचिपूर्णः कमनीयश्च। ऋग्वेदीयकालेऽपि सागरः न केवलं जलराशिः, अपितु कल्याणकरः देवता अभिहितः। ऋग्वेदे आपःसूक्ते समुद्रः दिव्यगुणैःसम्पन्नः, जलराशैराश्रयदाता भूतत्वात् पवित्रः कथितः।[22] पुराणेषु त्वयं पापघ्नः अमृतप्रदायकश्च। मत्स्यपुराणे सागराः दुःखहर्ताः दारिद्र्यनिवारकाश्च। [23] पुराणेषु सप्तसागरमहादानप्रसङ्गे उल्लिखितः यत्र समुद्रः दैवीयशक्तिरूपे पूजितः। [24] संस्कृतकथासाहित्येष्वपि सप्तसागरमहादानप्रसङ्गे सागरः तत्कालीनसामाजिकसांस्कृतिकोत्थानस्य आधारः। [25] महाभारतस्य आदिपर्वे समुद्रमंथनवर्णनं समुद्रं प्रति आध्यात्मिकभावं प्रस्तौति।[26] कालिदासस्य रचनासु अयं सांस्कृतिकादान-प्रदानस्य माध्यमः। अतः विभिन्नरूपेषु सागरोऽयं भारतीयसंस्कृतेर्प्रकाशस्तम्भः।

**निष्कर्षः**

संस्कृतसाहित्ये सागरः भारतीयसंस्कृतेर्स्थायित्वे प्रगतिशीलत्वे च सहायकः। भारतस्य भौगोलिकविस्तारं रेखाङ्कितं करोति, सांस्कृतिकपक्षं च प्रस्तौति। वैदिकसाहित्यादारभ्य आलौकिकसाहित्यं धार्मिकराजनैतिकव्यापारिकदृष्ट्या सागरः सदैव महत्त्वपूर्णो अभवत्। संस्कृतसाहित्येऽयं न केवलं जलराशिरूपेण अपितु स्वकीयविशालतागम्भीरतौदारतादिकारणैः प्रेरणास्रोतः, एकताप्रतीकः, मानवीयसंवेदनानां प्रकटीकरणस्य माध्यमश्च अस्ति। एतदातिरिक्तं भारतीयसमाजाय धार्मिकतायाः संस्कृतेश्च रक्षकरूपे अभिहितः। सदैव भारतीयादर्शान् विचारान् च मूर्तरूपप्रदायकः। पवित्रनदीनाम् आश्रयदाता, विष्णोर्शय्या, शिवपार्वत्योर्संगप्रतीकोऽयं सागरः भारतीयजनमानसस्य आध्यात्मिकभावनां निरूपयति। अतः

नवं नवक्षौमनिवासिनी सा भूयो बभौ दर्पणमादधाना॥ *कुमारसम्भवम्,* ७.२६

[16] *राजशेखर और उनका युग,* पाण्डेय रामेश्वर प्रसाद शर्मा पृष्ठ ३०४,३३४

[17] अच्छिन्नामलसंतानाः समुद्रोर्म्यनिवारिताः।
पुनन्ति लोकान्पुण्यत्वात्कीर्तयः सरितश्चते॥ *कुमारसम्भवम्,* ६.६९

[18] *रघुवंशमहाकाव्यम्,* १३.३-६

[19] स वेला वप्रवलयां परिखीकृतसागरम्।
अन्य शासनामुर्वी शशासैक पुरीमिव॥ *रघुवंशम्,* १.३०

[20] विवेश गत्वा स विलासकाननं ततः क्षणात्क्षौणिपतिर्धृतिच्छाया।
प्रवालरागच्छुरितं सुषुप्सया हरिर्घनच्छायमिवाम्भसां निधिम्॥ *नैषधीयचरितम्,*१.७४

[21] एष पर्व्वतमङ्काशो हनुमान् मारूतात्मजः।
तितीर्षति महावेगः समुद्रं वरूणालयम्॥ *रामायणम्,* सुन्दरकाण्डम् १.२९

[22] समुद्रज्येष्ठाः सलिलस्य मध्यात्पुनाना यन्त्यानिविशमानाः।
इन्द्रो या वज्री वृषभो रराद ता आपो देवीरिहमामवन्तु॥ *ऋग्वेदः,* ७.४९.१

[23] *मत्स्यपुराणम्,* २८८,१२-१३

[24] *मत्स्यपुराणम्,* २८७

[25] *कथासरित्सागरम्,* ५४,१०८

[26] *महाभारतम्,* आदिपर्व अध्याय १८-१९

संस्कृतसाहित्ये सागरः विविधज्ञानविधानां प्रकाशस्तम्भः इति।

**सन्दर्भग्रन्थसूचिः**


1. *अथर्ववेद का सुबोधभाष्य.* दामोदर सातवलेकर. पारडी: स्वाध्याय मण्डल, १९३८.
2. अग्निहोत्री, प्रभुदयाल. *पतंजलिकालीन भारत.* पटना: बिहार राष्ट्रभाषा परिषद, १९६३.
3. उपाध्याय, भगवतशरण. *कालिदास का भारत.* काशी: भारतीय ज्ञानपीठ, १९५५.
4. उपाध्याय, बलदेव. *पुराण विमर्श.* वाराणसी: चौखम्बा विद्याभवन, १९६५.
5. उपाध्याय, बलदेव. *संस्कृत साहित्य का इतिहास.* वाराणसी: शारदा निकेतन, १९६५
6. *ऋग्वेद संहिता,* पूना: वैदिक संशोधन मंडल, १९७२.
7. *कुमारसम्भवम्.* कालिदास. (व्या०) कृष्णमणि त्रिपाठी. वाराणसी: चौखम्बा सुरभारती प्रकाशन, २०११.
8. कुमार, कृष्ण. *प्राचीन भारत का भौगोलिक परिवेश.* हरिद्वार: मयंक प्रकाशन, २००४.
9. द्विवेदी, कैलाशनाथ. *कालीदासीय भूगोल.* जयपुर: रचना प्रकाशन, २०१५.
10. पाठक, सर्वानन्द. *विष्णुपुराण का भारत.* वाराणसी: चौखम्बा विद्याभवन, १९६७.
11. *भट्टिकाव्यम्.* भट्टि. (व्या०) पं० शेषराज शर्मा रेग्मी. वाराणसी: चौखम्बा संस्कृत सीरीज आफिस, २०१५.
12. *रघुवंशम्.* कालिदास. (व्या०) कृष्णमणि त्रिपाठी. वाराणसी: चौखम्बा सुरभारती प्रकाशन, २०११.
13. *शिशुपालवधम्.* माघ. (व्या०) पण्डित हरगोविन्दशास्त्री. वारणसी: चौखम्बा विद्याभवन, २०१०.
14. *श्रीमार्कण्डेयपुराणम्.* वाराणसी: चौखम्बा विद्याभवन, २०१८
15. *हनुमन्नाटकम्.* दामोदर मिश्र. मुम्बई: खेमराज श्री कृष्णादास, १९०९.